२ । ४ । ६२ ॥ कर्णस्फोटालता । जलपिप्पली । द्रोणपुष्पी । इति राजनिर्घण्टः ॥ मञ्जिष्ठा । इति रत्नमाला ॥ (यथास्याः पर्य्यायाः ।
"मञ्जिष्ठा विकसा जिङ्गी काला योजनपर्ण्यपि ।
ताम्रवल्ली चित्रपर्णी काश्मीरी रक्तयष्टिका ॥"
इति वैद्यकरत्नमालायाम् ॥)

चित्रपादा, स्त्री, (चित्रौ पादौ यस्याः ।) सारिकापक्षी । इति हारावली । ८८ ॥

चित्रपिच्छकः, पुं, (चित्राणि पिच्छानि पुच्छकानि यस्य । ततः कप् ।) मयूरः । इति राजनिर्घण्टः ॥

चित्रपुङ्खः, पुं, (चित्रः पुङ्खो यस्य ।) शरः । इति त्रिकाण्डशेषः ॥

चित्रपुष्पी, स्त्री, (चित्राणि पुष्पाणि यस्याः । स्त्रियां ङीष् ।) अम्बष्ठा । इति राजनिर्घण्टः ॥ (विवरणमम्बष्ठाशब्देऽस्या ज्ञेयम् ॥)

चित्रपृष्ठः, पुं, (चित्रं नानावर्णं पृष्ठं यस्य ।) कलविङ्कपक्षी । इति हारावली । ८६ ॥

चित्रफलः, पुं, (चित्रं फलं फलकं तद्वदाकृतिर्विद्यतेऽस्य । अच् ।) मत्स्यविशेषः । चितल इति भाषा ॥ अस्य गुणाः । गुरुत्वम् । स्वादुत्वम् । स्निग्धत्वम् । हृद्यत्वम् । बलप्रदत्वञ्च । इति राजवल्लभः ॥

चित्रफलकः, पुं, (चित्रफल + स्वार्थे कन् ।) चित्रफलमत्स्यः । इति भूरिप्रयोगः ॥

चित्रफला, स्त्री, (चित्राणि फलानि यस्याः ।) चिर्भिटा । मृगेर्व्वारुः । लिङ्गिनी । महेन्द्रवारुणी । वार्त्ताकी । कण्टकारी । इति राजनिर्घण्टः ॥ मत्स्यविशेषः । फलइ इति भाषा ॥ तत्पर्य्यायः । राजग्रीवः २ फलकी ३ महोन्मदः ४ । इति शब्दरत्नावली ॥

चित्रभानुः, पुं, (चित्रा नानावर्णा भानवो रश्मयो यस्य ।) अग्निः । (यथा, महाभारते ।२।३१।४२।
"चित्रभानुः सुरेशश्च अनलस्त्वं विभावसो ! ॥")
सूर्य्यः । इति मेदिनी । ने, १८३ ॥ चित्रकवृक्षः । अर्कवृक्षः । वह्निसंज्ञक इति अर्काह इति चामरदर्शनात् ॥ भैरवः । इति शब्दरत्नावली ॥ (वर्षविशेषः । यथा, बृहत्संहितायाम् ।८।३५।
"श्रेष्ठं चतुर्थस्य युगस्य पूर्व्वं
यच्चित्रभानुं कथयन्ति वर्षम् ॥")

चित्रभेषजा, स्त्री, (चित्रं भेषजं यस्याः ।) काकोडुम्बरिका । इति राजनिर्घण्टः ॥

चित्रमेखलः, पुं, (चित्रा विचित्रा मेखला यस्य ।) मयूरः । इति त्रिकाण्डशेषः ॥

चित्रयोधी, [न्] पुं, अर्ज्जुनवृक्षः । इति राजनिर्घण्टः ॥ (चित्रं यथा स्यात् तथा युध्यतीति । युध + णिनिः ।) पार्थः ॥ (चित्रयुद्धशीले, त्रि । यथा, महाभारते । १ । १ । १८६ ।
"यदा द्रोणो विविधानस्त्रमार्गा-
न्निदर्शयन् समरे चित्रयोधी ॥")

चित्ररथः, पुं, (चित्रो रथो यस्य ।) सूर्य्यः । गन्धर्व्वविशेषः । इति मेदिनी । थे, २८ ॥ शेषस्य पर्य्यायः । गन्धर्व्वराजः २ अङ्गारपर्णः ३ कुवेरसखः ४ दग्धरथः ५ । (यथा, महाभारते । १ । १७१ । ३७—३६ ।

गन्धर्व्व उवाच ।
"जितोऽहं पूर्व्वकं नाम मुञ्चाम्यङ्गारपर्णताम् ।
न च श्लाघे बलेनाङ्ग ! न नाम्ना जनसंसदि ॥
साध्विमं लब्धवाँल्लाभं योऽहं दिव्यास्त्रधारिणम् ।
गान्धर्व्व्या माययेच्छामि संयोजयितुमर्ज्जुनम् ॥
अस्त्राग्निना विचित्रोऽयं दग्धो मे रथ उत्तमः ।
सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम् ॥")
स तु मुनिनाम्न्यां दक्षकन्यायां कश्यपौरसाज्जातः । इति महाभारते । १ । ६५ । ४३ ॥

चित्रलः, पुं, (चित्रमाश्चर्य्यं लातीति । ला + कः ।) कर्व्वुरवर्णः । तद्वति त्रि । इति शब्दरत्नावली ॥

चित्रलता, स्त्री, (चित्रा नानावर्णा लता ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

चित्रला, स्त्री (चित्रल + "अजाद्यतष्टाप् ।" ४ । १ । ४ । इति टाप् ।) गोरक्षीवृक्षः । इति राजनिर्घण्टः ॥

चित्रलेखा, स्त्री, (चित्रो लेखो लेखनशक्तिर्यस्याः । चित्रं लेखयतीति वा । लिख + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । चित्रलेखनदक्षतयास्यास्तथात्वम् ।) अप्सरोविशेषः । सा ऊषायाः सखी कुम्भाण्डस्य कन्या । यथा, हरिवंशे । १७४ । ७४—७५ ।
"उवाच रुदतीश्चैव कुम्भाण्डतनया सखीम् ।
कुशला ते विशालाक्षि ! सर्व्वथा सन्धिविग्रहे ॥
अप्सराश्चित्रलेखा वै क्षिप्रं विज्ञाप्यतां सखि ! ॥"
यथा, श्रीभागवते । १० । ६२ । १४ ।
"बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता ।
सख्यपृच्छत् सखीमूषां कौतूहलसमन्विता ॥"
(अस्याश्चित्रलेखनपटुत्वकथा यथा हरिवंशे । १७४ । ८०—८८ ।
"चित्रलेखाऽब्रवीद्वाक्यमूषां हर्षयती शनैः ॥"
"देवदानवयक्षाणां गन्धर्व्वोरगरक्षसाम् ।
ये विशिष्टाः प्रभावेण रूपेणाभिजनेन च ॥
यथा प्रधानतः सर्व्वानालिखिष्याम्यहं सखि ! ।
मनुष्यलोके ये चापि प्रवरा लोकविश्रुताः ॥
सप्तरात्रेण ते भीरु ! दर्शयिष्याम्यहं प्रियम् ।
ततो विज्ञाय पट्टस्थं भर्त्तारं प्रतिलप्स्यसे ॥
सा चित्रलेखया प्रोक्ता ऊषा हितचिकीर्षया ।
क्रियतामेवमित्याह चित्रलेखां सखीं प्रति ॥
ततः कुशलहस्तत्वात् यथा लेख्यं समन्ततः ।
इत्युक्ता सप्तरात्रेण कृत्वा लेख्यगतांस्तु तान् ॥
चित्रपट्टगतान् मुख्यानानयामास शोभना ॥")
छन्दोविशेषः । इति छन्दोमञ्जरी ॥ अस्य विवरणं छन्दःशब्दे द्रष्टव्यम् ॥

चित्रलोचना, स्त्री, (चित्रे लोचने यस्याः ।) सारिकापक्षी । इति जटाधरः भूरिप्रयोगश्च ॥

चित्रवदालः, पुं, (चित्रवत् आ समन्तादलति पर्य्याप्नोतीति । आ + अल + अच् ।) पाठीनमत्स्यः । इति जटाधरः ॥

चित्रवल्लिकः, पुं, (चित्रा विचित्रा वल्लिर्लता । सा इव कायतीति । कै + कः ।) वदालमत्स्यः । इति हेमचन्द्रः । ४ । ४११ ॥

चित्रवल्ली, स्त्री, (चित्रा विचित्रा वल्ली लता यस्याः ।) मृगेर्व्वारुः । महेन्द्रवारुणी । इति राजनिर्घण्टः ॥

चित्रवीर्य्यः, पुं, (चित्रमाश्चर्य्यजनकं वीर्य्यमस्य ।) रक्तैरण्डः । इति राजनिर्घण्टः ॥

चित्रशिखण्डिजः, पुं, (चित्रशिखण्डिनोऽङ्गिरसो मुनेर्ज्जायते इति । जन + डः ।) बृहस्पतिः । इत्यमरः । १ । ३ । २४ ॥

चित्रशिखण्डिप्रसूतः, पुं, (चित्रशिखण्डिनोऽङ्गिरसः प्रसूतः सन्ततिः ।) बृहस्पतिः । इति हलायुधः ॥

चित्रशिखण्डी, [न्] पुं, (चित्रः शिखण्डः शिखा अस्त्यस्य । "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) सप्तर्षयः । इत्यमरः । १ ।३।२७॥ यथाह भरतः ।
"मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः ।
वशिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः ॥"
(यथाच, महाभारते ।१२।३३५।२६—२८ ।
"ये हि ते ऋषयः ख्याताः सप्त चित्रशिखण्डिनः ।
तैरेकमतिभिर्भूत्वा यत् प्रोक्तं शास्त्रमुत्तमम् ॥
वेदैश्चतुर्भिः समितं कृतं मेरौ महागिरौ ।
आस्यैः सप्तभिरुद्गीर्णं लोकधर्म्ममनुत्तमम् ॥
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
वशिष्ठश्च महातेजास्ते हि चित्रशिखण्डिनः ॥")

चित्रसर्पः, पुं, (चित्रः नानावर्णरञ्जितः सर्पः ।) मालुधानसर्पः । इति शब्दरत्नावली ॥

चित्रसेनः, पुं, ब्रह्मपादजमसीशाख्यकायस्थस्य चित्रगुप्तादित्रितयान्तर्गतमूर्त्तिविशेषः । स तु मर्त्यलोकविवेचकः । यथा,—
"चित्रसेने महाविद्यां वगलेति गुरोर्नयन् ।
जप्त्वा सन्तोष्य पुत्रादीन् याचित्वा प्राप्य मर्त्यतः ॥
राज्यं चकार षट्युक्तश्चित्राङ्गद अधो गतः ॥"
इत्याचारनिर्णयतन्त्रम् ॥
(चित्रा सेना यस्य । गन्धर्व्वविशेषः । यथा, महाभारते । २ । १० । २५ ।
"चित्रसेनश्च गीतज्ञस्तथा चित्ररथोऽपि च ।
एते चान्ये च गन्धर्व्वा धनेश्वरमुपासते ॥"
धृतराष्ट्रपुत्रविशेषः । यथा, महाभारते । १ । ६५ । ५७ । "तेषां धृतराष्ट्रस्य पुत्राणां चत्वारः प्रधाना बभूवुः । दुर्य्योधनो दुःशासनो विकर्णश्चित्रसेनश्चेति ॥" पूरुवंशीयस्य परिक्षितः पुत्राणामन्यतमः । यथा, महाभारते । १।६४।५२ ।
"परिक्षितोऽभवन् पुत्राः सर्व्वे धर्म्मार्थकोविदाः ।
कक्षसेनोग्रसेनौ च चित्रसेनश्च वीर्य्यवान् ॥"
शम्बरासुरस्य पुत्रविशेषः । यथा, हरिवंशे । १६१ । ४३ ।
"चित्रसेनोऽतिसेनश्च विश्वक्सेनजितस्तथा ॥"
नरिष्यन्तपुत्रः । यथा, भागवते । ६ । २ । १६ ।
"चित्रसेनो नरिष्यन्तात् दक्षस्तस्य सुतोऽभवत् ॥")